**International Journal of Research in Social Sciences**
**Vol. 9, Issue 1, January - 2019,**
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# अनुपलब्धिविचार:

**डॉ. पीताम्बरमिश्र:**

**संविदाध्यापक:**

**नव्यन्यायविभाग:**

**श्रीसदाशिवपरिसर:,पुरी, ओडिश**

अभावलक्षणमेवमभाषि भाष्यकारेण शवरस्वामिना। यथा- अभावोऽपि प्रमाणाभावो नास्तीत्यर्थस्यासन्निकृष्टस्य इति (बृहती-१९८)

मीमांसकामतानुरोधं षष्ठं प्रमाणमभाव:। अस्यैवानुपलब्धिरिति व्यवहार:। अनुपलब्धिर्नाम उपलब्धेरभाव:। प्रत्यक्षानुमानादिप्रमाणपञ्चकप्रवृत्तिप्रतियोगिक: स: अभाव: भवति। तथा च प्रवृत्तियोग्यानां प्रत्यक्षीदीनां पञ्चानां प्रमाणानां यत्र वा न प्रवृत्ति: सा योग्यानुपलब्धिरित्युच्यते। सा च घटाद्यभावविषयिणी षष्ठं प्रमाणमिति भाट्टसिद्धान्त:।

न च कथं नाम प्रमाणाभाव: प्रमाणलक्षणं भवितुमर्हति। स्ववचनव्याघातादिति वाच्यम्। प्रमाणाभावलक्षणगतस्य प्रमाणशब्दस्य सत्पदार्थोपलम्भकप्रत्यक्षादिप्रमाणपञ्चकाभिप्रायकत्वात्। तदभाव: षष्ठस्याभावाख्यप्रमाणस्य लक्षणमिति न काचिदनुपपत्ति:। किं नामास्य प्रमेयम्? उक्तं हि लक्षण एव नास्तीत्यर्थस्य इति। लोके हि वस्तु द्विविधम्। सद्रूपं, असद्रूपं चेति। सद्रूपेणे वर्तमानस्य घटपटादे: प्रत्यक्षादिभि: सत्ता प्रतीयते। यच्चासद्रूपेण वर्त्तते तत्र सद्रूपबोधकानां प्रत्यक्षादीनां सद्रूपबोधने सत्यपि योग्यत्वे य: अनुत्पाद: दृश्योदर्शनयोग्यानुपलम्भादिपर्याय: स एव प्रमाणाभावपदेन अभाषि शवरस्वामिना। तेनैव अभावाख्यप्रमाणेन इन्द्रियशब्दादिस्थानीयेन नास्तीति प्रतीतिरुपजायते। यथा भूतलघटो नास्तीति। (श.दी-८३)

नास्ति इति रूप अभावाख्यं प्रमेयं चेदं प्राग्भाव-प्रध्वंसाभाव-अन्योन्याभाव-अत्यन्ताभावभेदेन चतुर्धा व्यभजत् श्लोकवार्त्तिककार:।

**International Journal of Research in Social Sciences**
**Vol. 9, Issue 1, January - 2019,**
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

अनुपलम्भोऽयं द्विविध:-प्रमाणाभावरूप:, स्मरणाभावरूपश्चेति। प्रत्यक्षप्रमाणाभावरूपादनुपलम्भात् घटपटाद्यभावज्ञानमुपजायते। तथा च योग्योनुमानादय:। अनुमानप्रमाणगम्यानां पदार्थानामभावग्रहणे बोधक: भवति। उक्तं च मनोरथमिश्रै:। यथा-चेष्टालिङ्गकानुमानस्य रूपदर्शनबोधकस्यानुदय: दिवा रूपदर्शनाभावं अनुकुलस्य गमयतीति। एवमेव इतरप्रमाणभावरूप: अनुपलम्भ: सुलभ:। स्मरणजाभावरूप: अनुपलम्भो यथा अत्र मैत्र: प्रातर्नासीदिति सायङ्काले ज्ञानम्। प्रातकालविशिष्टस्य मैत्रस्य सायंकाले दर्शनयोग्यत्वाभावात् सति च स्मरणयोग्यत्वे स्मरणाभाव एव तदा प्रात:कालविशिष्टमैत्राभावस्य बोधक इत्यङ्गीक्रियते इति। (मा.म-१३४)

अनुपलब्धे: प्रमाणान्तरत्वविचारावसरे भाट्टमतानुरोधमनुपलब्धि: पृथक् प्रमाणं भवितुमर्हति। उक्तपूर्वप्रमाणेष्वनन्तरर्भावात्। तथा हि न सा प्रत्यक्षेऽन्तर्भवति। इन्द्रियसन्निकर्षाद्यभावेऽपि तदुत्पत्ते:। यश्च प्रात: गृहेऽवस्थित: मध्याह्ने स एवं पृच्छते। किं प्रातरस्मिन् गृहे कश्चित् श्याम: लोहिताक्ष: दृष्टो भवतीति। स च सच्च एव योग्यस्मरणानुदयात् प्रात:कालिकेन्द्रियव्यापारमन्तरैव तस्याभावमवधारयति। अतएवं ज्ञातुं शक्यते यत् तदिदं ज्ञानेन इन्द्रिय कारणम्। (शा.दी-८६-८७) न च वाच्यम् अस्तु विशेषणत्वादि: सन्निकर्ष इति। प्रत्येकवृत्ते: तस्योभयनिष्ठत्वाभावात् सन्निकर्षत्वस्यैवानङ्गीकारात्। (भा.चि-४६)

अथ कैश्चिदुच्यते प्रत्यक्षत्वमभावस्य तथा चायं प्रयोग:। अभाव: प्रत्यक्ष:, अपरोक्षप्रतीतित्वात्। घटवत् इति चेत् न, अभावस्यापरोक्षाप्रतीतित्वाभावात्, हेतो: स्वरूपसिद्धत्वात्। (मा.मे-९३७) अपरोक्षतया भूतलादे: तथैव अभावोऽपीति भ्रमत्वात्। एवमेव मानमेयोदये उदयनेनोक्ता: चत्वारोऽपि हेतव:। अभावप्रत्यक्षगमका: हेत्वाभासा इति निरस्ता:।

न चाप्याभावो अनुमेय:। हेतुहेतुमतो: सम्बन्धग्रहाभावात्। नापि अनुपलब्धे: उपमानादिष्वन्तर्भाव:। उपमानादिहेतो: सादृश्यज्ञानादे: तत्राभावात्। अत: पृथक् प्रमाणभूतया अनुपलब्ध्येव अभाव: ग्राह्य इति सिद्धं पृथक् प्रमाणत्वमनुपलब्धे:। (शा.दी-८७)

भाट्टचिन्तामणिकारस्तु एवं प्रतिपादयति। यदि अधिकरणात्मकत्यमभावस्य अङ्गीक्रियते तर्हि भूतले घटाभाव इत्याधारधेयभावस्यानुपपत्ति: स्यात्। अत: अभावस्य पृथक् प्रमाणत्वं अङ्गीकार्यमेवेति। प्रतियोगिप्रत्यक्षाभाव: करणम्। अनुमिति: अवान्तरव्यापार:। अभावज्ञानं फलम्। अर्थापत्तौ च उपपरद्यज्ञानं करणम्। अनुपपत्तिज्ञानं अवान्तरव्यापार:। उपपादकज्ञाने भाट्टमते षट् प्रमाणानीति। (भा.चि-४६-४७) एवमुक्त्वा पुन: यथार्थत: अर्थापत्यनुपलब्ध्यो: परस्परभेदं अनुमानप्रमाणात् तयो: भेदं च नावगच्छाम इति सहृदहृनिहितं तात्पर्यमन्ते चाविष्करोति गागाभट्ट:।

इदमत्र साधकानुमानं अभाव:स्वानुरूपेण प्रमाणेन गृह्यते। प्रमेयत्वात् भाववत् इति। उक्तं चैवमेव वार्त्तिककारेण कुमारिलभट्टेन। अत: अस्ति षष्ठं प्रमाणपरतया अनुपलब्ध्या सह प्रायोजि। प्रमेयपरतया च प्रयुक्तमिति वेदितव्यम्। तत: क्रमानुसारेण प्रभाकरै: स्वमतस्थापने अभावस्योपरि विचारितम्। अभावप्रामाण्यं ते नाभ्युपच्छन्ति। अभावस्य अधिकरणात्मकत्वं तैरंग्यकारि।

अत: भावातिरिक्तस्य अभावरूपस्य प्रमेयस्यैवाभावात् तन्निरूपणार्थं अनुपलब्धे: प्रमाणान्तरत्वमपि नाङ्गीकरणीयमिति तेषामाशय:। (प्र.प.-२८२)

ननु सर्वजनीनोऽयमनुभव: यत्-लोके सर्वं प्रमाणं किमपि प्रमेयं विना न भवतीति। तर्हि अभावाख्यस्य प्रमाणस्य किं वा प्रमेयमस्तीति? कथ्यते अस्तिप्रमेयमस्यापि। तत्पुन: न प्रमाणान्तरेण बोध्यते। प्रमाणस्य हि एष स्वभाव: यत् स्वमहिम्नैव स्वप्रमेयस्योपस्थापनं नाम प्रत्यक्षस्य प्रमेयं प्रमाणान्तर व्यवस्थाप्यम्? प्रतीतिबलसिद्धमेव। अत: अभावरूपं प्रमाणमपि दर्शितं भवति। स्वमहिम्नैव प्रमेयमुपस्थापयितुं क्षमम्। तथा हि अस्ति काचन प्रतीति: इह भूतल घटो नास्तीति। सा च न भूतलमात्रविषया। घटे सत्यपि तथा आपत्तिप्रसङ्गात्। यदि केवलभूतलविषयेत्युच्यते चेत्-किमत्र कैवल्यम्? यदि भूतलस्वरूपं उच्यते सत्यपि घटे तस्यानपायात् नास्ति घट इति बुध्युत्पाद:। इन्द्रियव्यापारं विना प्रतीयमानत्वात् नेदं प्रत्यक्षप्रमेयमिति वक्तुं शक्यते। अत: इह भूतले घटो नास्तीति प्रतीतिबलात् विलक्षणप्रमेयस्य अङ्गीकार्यतया प्रमाणमपि अभावरूपं विलक्षणमङ्गीकार्यमिति चेत्-

**International Journal of Research in Social Sciences**
**Vol. 9, Issue 1, January - 2019,**
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

उच्यते अधिकरणस्वरूपपातिरिक्त: अभाव: अस्मन्मते नाभ्युपगम्यते। द्विधा हि भावना अवगति: सम्पद्यते। एका भावान्तरसंसृष्टविषया तदेकविषया च द्वितीया। या च तदेकविषया बुद्धि: साऽपि पुनर्द्विविधा। प्रतियोगिनि दृश्ये अदृश्यं च। एवञ्च दृश्ये प्रतियोगिनि या तदेकविषया बुद्धि: सा तस्य प्रतियोगिन: अभाव इत्युच्यते। यथा- भूतले घटाभाव इति।

एवञ्च भूतले घटो नास्ति इत्युक्ते घटे दृश्ये भूतलमात्रस्यैव बाध इति फलति।

प्रतियोगिनि दृश्यत्वं नाम अन्यत्र प्रमितस्य अन्यत्र प्रसक्ति:। सैव दृश्यता प्रभाकरै: ज्ञानविशेषतया अङ्गीकृतेति धर्मिकल्पनापेक्षया धर्मकल्पना लाघवमेव। अत: अधिकरणस्वरूप एवाभाव: अङ्गीक्रियते गुरुमतानुयायिभि: न तद्विलक्षण इति

अनुपलब्धे: प्रत्यक्षादिगतार्थत्वानुसारेण भाट्टैस्तावत् अनुपलब्धे: पृथक् प्रमाणत्वं महता आग्रहेण अभ्युपगम्यते। ते च कथयन्ति अभावाख्य: कश्चन पदार्थ: अस्तीति अवश्यमभ्युपगन्तव्य:। स च न पूर्वोक्तप्रमाणगम्य:, केवलमनुपलब्धिगम्य एवेति। प्राभाकरास्तु अभावस्य पदार्थत्वमेव नाङ्गीकुर्वन्ति। नैयायिका: पुन: अभाव: पदार्थ एव सत्यम्। किन्तु तदग्रहणार्थं प्रमाणान्तरमनुपलब्धिरुपमनावश्यकमिति मन्यन्ते।

तथाहि-प्रत्यक्षादिभि: गृह्यमाणतया अभावाख्यं प्रमेयं आत्मपरिच्छित्तये न प्रमाणान्तरमपेक्षत इति तेषामभिसन्धि:। तथा हि-इह घटो नास्ति इति एकमेव ज्ञानम्। इह कुण्डे दधीतिज्ञानवत्। न च तत्र भूप्रदेशमात्र एव नायनं ज्ञानम्। इतरत्रे तु प्रमाणान्तरजन्यमिति वाच्यम्। अव्यवधानेनैव भूप्रदेशवत् घटनास्तितया अपि विना विच्छेदं अनुभूयमानत्वात्। अत्र अपरिम्लाननयनव्यापार एव पुरुष: घटाभावं पश्यतीति अभावज्ञानं चाक्षुषमेव। तद्भावित्वविधानात्।

न च तर्हि सम्बन्धस्यैव हि चक्षुषा ग्रहणमिति। असम्बन्धस्यापि चाक्षुषत्वे भवतु नाम विभीषणादेरपि चाक्षुषत्वप्रसङ्ग इति वाच्यम्। भावपदार्थेषु खल्वयं नियम: यत् सम्बन्धस्यैव चक्षुषा ग्रहणम्। न

**International Journal of Research in Social Sciences**
**Vol. 9, Issue 1, January - 2019,**
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

त्वसम्बन्धस्येति। अभावस्तु असम्बद्धोऽपि चक्षुषा ग्राह्य एव। सन्निकर्षेषु षट् प्रकाराभिवर्णनमपि भावपदार्थाभिप्रायेणैव। सम्बद्धं यद् वस्तु गृह्यते तदवश्यं पूर्वोक्तसन्निकर्षान्यतमेनैव ग्राह्यमिति।

एवं इन्द्रियाणां प्राप्यकारित्वमपि वस्त्वभिप्रायकतयैवोक्तम्। अभावस्तु न वस्तु।

अत: तेन सन्निकर्षमन्तरापि चक्षुस्तदवगमयति। न च तर्हि विना सम्बद्धमेवाभाव: गृह्यते चेत् देशान्तरस्थितसर्वाभावग्रहणमपि प्रसज्येतेति वाच्यम्। आश्रयग्रहणसापेक्षा हि नाम अभावप्रतीति:। स चाश्रय: सन्निहित एव प्रत्यक्षयोग्यभवति। अथवा संयुक्तविशेषणभावाधिसन्निकर्षद्वारा चक्षुरेव अभावं गृह्णातीत्यपि वक्तुं शक्यते। अयमेव विशेषणविशेष्यभावाख्य: सन्निकर्ष: कथ्यते। एवञ्च प्रत्यक्षगम्य एवाभाव: नानुपलब्धिगम्य इति नैयायिकानां पन्था:। (न्या.म.-५१-५३)

वैशेषिकस्तु नैयायिकेभ्य: अत्र भिद्यन्ते। अभावस्यानुमान एवान्तर्भाव इति तेषामाशय:। प्रशस्तपाद: स्वपदार्थधर्मसंग्रहे अभावस्य अनुमान एवान्तर्भाव इति सुष्टु प्रतिपादितम् उपस्कारकार: शङ्करमिश्रस्तु अभावस्य क्वचित् प्रत्यक्ष्ये क्वचिच्चानुमाने अन्तर्भावमभिदधे। न च इन्द्रियमधिकरणग्रहणं एवोपक्षीणमिति वाच्यम्। अभावग्रहणावधि तद्व्यापारस्य वर्तमानत्वात् अभावस्यानुमानेऽन्त्वभविता नैयायिकानामपि न विरुद्धा। असन्निहितदेशवर्त्तिन: अभावस्य अनुमेयत्वात्। यथा समन्तत: बहुलमभिवर्षति देवे मेघवायुसंयोगाभाव: अनुमीयते। तथैवार्थापत्तौ गृहे अभावेन चैत्रस्य बहिरभावकल्पनं इत्युदाहरणम्।

ननु अनुरूपेण प्रमाणेन प्रमेयं प्रतीयत इति लोकानुभव:। अत: अभावरूपप्रमेयस्य तदनुरूपेण प्रमाणेन ग्रहणमेव वक्तव्यमिति चेत्न। अप्रयोजकत्वात् इदमत्र तत्वं यत् भाट्टै: अभाव: पदार्थ: स: अनुपलब्धिप्रमाणगम्य: इत्यभ्युपगतम् प्राभाकरैस्तावत् अभावस्य पदार्थत्वमेव नाङ्गीकृतम्। अत: अनुपलब्धिगम्यत्वमपि तस्य पाथेयं तेषां मते। नैयायिकास्तावत् अभावस्य पदार्थतामभ्युपगम्य तस्य प्रत्यक्षादिगम्यत्वमुपगच्छन्ति। अत एव ते अनुपलब्धे: प्रमाणत्वं न प्रतिपादयन्ति। इयमेवानुपलब्धि: अनुपलम्भ: इत्यपि व्यवह्रियते दार्शनिकै:

**पादटिप्पणी**

(१) Vide PMS.P.144. When the First five means of cognition do not function to words bringing about the cogrition of the existence of a certain object, then those comes to function that (Sixth) means of cognition which is known as Abhava Non-Apprehenrion Negation. It is through thin means og cognition cognised.

(२)अथोपलम्भयोग्यत्वे सत्यप्यनुपलम्भनम्।

अभावाख्यं प्रमाणं स्यात् अभावस्यावबोधकम्।। (मा.मे-१३२)

(३)प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।

वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता।। (श्लो.वा-४७३)

(४)क्षीरे दध्यादि यन्नास्ति प्राग्भाव: स उच्यते।

नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणम्।।

गवि योऽश्वाद्यभावस्तु सोऽन्योऽन्याभाव उच्यते।

शिरसोऽवयवा निम्ना: वृद्धिकाठिन्यवर्जिता:।।

शशो श्रृङ्गादिरूपेण सोऽत्यन्ताभाव उच्यते। (श्लो.वा-४७३-४७४)

(५)प्रतिपत्तेरपारोक्ष्यात् इन्द्रियस्यानुपक्षयात्।

अज्ञानकरणत्वाच्च भावावेशाच्च चेतस:।।(न्या.कु-३-२०)

(६)अस्ति चेदुपलभ्येतेत्यस्य कोऽर्थो विचार्यताम्। घटादन्योत्र सर्वोऽपि ज्ञानहेतुरभूदिति।।

संस्कारोहि स्मृतौ हेतुं स चाज्ञातोऽवबोधक:।

अज्ञातकरणाप्येवं स्मृतिर्नाध्यक्षतां गता।।

न खल्विन्द्रियदोष: स्यात् अभावभ्रमकारणम्।

योग्यता भ्रम एवात्र तत्कारणमितीरितम्।।

अपि चेन्द्रियसम्बन्धयोग्यतैव हि वस्तुन:।

प्रत्यक्षत्वं उपाधि: स्यात् व्याप्त्यसिद्धास्ततोऽखिला:। (मा.मे-१३८-४१)

(७)वस्तुतस्तु अर्थापत्यनुपलब्ध्यो: अन्योन्यभेदं

अनुमानाच्च भेदं नाकलयाम: (भा.चि-४७)

(८)भावात्मके यथा मेये नाभावस्य प्रमाणता।

तथाभावप्रमेयेऽपि न भावस्य प्रमाणता।। (श्लो.वा-७४)

(९)अभावाख्यप्रमाणं ये षष्ठमाहुर्मनीषिण:।

तेषां प्राभाकरैरेवं प्रत्यादेशोऽयमुच्यते।।(प्र.प.-१०६-१११)

(१०)अभावोऽप्यनुमानमेव। यथोत्पन्नकार्य कारणसद्भावे लिङ्गं।

एवमनुत्पन्नं कार्य कारणसद्भावे लिङ्गम्। (प्र.भ.-१११)

(११)तत् क्वचित्प्रत्यक्षे क्वचिच्चानुमानेऽन्तर्भूतं।

चक्षुरादिनैवाभावग्रहात्।। (वै.त्रप.-२२८)

(१२)आगमादप्यभावस्य क्वचिद् भवति निश्चय:।
चौरादिनास्तिता ज्ञानमध्वगानामिवाप्तत:।। (न्या.म.-६४)